**( अव० )** विकालेन अपराह्णरूपेण निर्वृत्तानि=वैकालिकानि दश अध्ययनानि यत्र तत् श्रीशय्यम्भवसूरिकृतं दशवैकालिकं मेरुमिव रोचिष्णू=दीप्ते चूलिके ***इह खलु०*** (द०वै०चू०१) ***चूलिअं तु पव०*** (द०वै०चू०२) रुपे यत्र । पक्षे चूला ४० (चत्वारिंशत्) योजनमाना । सुमनसाम्=उत्तमानाम्, पक्षे देवानां प्रीतिस्थानं सत्क०=श्रेयोमयम् पक्षे[१] सुवर्णमयं स्तुमः ॥४॥

**[ मू० ] उद्यामुपोद्घातविकल्पकाल-**
**भेदप्रभेदप्रतिभेदरूपाम् ।**
**मिताभिधानाममिताभिधेयां**
**नौम्योघनिर्युक्तिम[1]मोघयुक्तिम् ॥५॥** ( उपेन्द्रवज्रा )

**( अव० )** उद्यां=प्रशस्यां मिताभिधानां=स्तोकशब्दां अमिताभिधेयां=बह्वर्थां अमोघयुक्तिं=सफलयुक्तिम् ओघनिर्युक्तिं नौमि=स्तौमि[1] । किं विशिष्टाम् ? **उपो०** उपोद्घातः= शास्त्रस्यादिः । तस्य विकल्पा=द्वाराणि ★**उद्देसे निद्देसे अनिग्गमे खित्तकाल**[2] इत्यादीनि २६ (षड्विंशतयः) (आ०नि०१४०) तत्र विकल्परूपः कालः तस्य भेदाः ११ (एकादश) नामस्थापनाद्रव्यादयः •**दव्वे अद्ध अहाउअ उवक्कमे** (आ०नि०६६०) इत्यादिगाथयोक्ताः । तेषु षष्ठस्य[3] भेदस्योपक्रमकालस्य प्रभेदौ सामाचार्युपक्रमकालः यथायुष्कोपक्रमकालश्च[4] । तयोः प्रथमस्य त्रयः प्रतिभेदाः ओघसामाचारी, इच्छाकारादिदशविधसामाचारी, पदविभाग-सामाचारी (च) त्रि(ते)षु ओघः=सामान्यं सङ्क्षेपाभिधानरूपा सामाचारी ओघसामाचारी[5] तद्रूपा ओघनिर्युक्तिः श्रीभद्रबाहुस्वामिना नवमपूर्वात्तृतीयादाचाराभिधवस्तुनो[6] विंशतितमप्राभृतान्निर्यूढा साम्प्रतिकसाधूनां हिताय अस्मिन्काले स्थिरीकृता श्रीआवश्यकनिर्युक्तौ गणधरवादस्याग्रे । सम्प्रति च सुखपाठाय पृथगग्रन्थरूपा विहिताऽस्ति, ताम् ॥५॥

**[ मू० ] पिण्डविधिप्रतिपत्तावखण्डपाण्डित्यदानदुर्ललिताम् ।**
**ललितपदश्रुतिमृष्टा[1]मभिष्टुमः पिण्डनिर्युक्तिम् ॥६॥** ( आर्या )

---

★ उद्देसे निद्देसे अनिग्गमे खित्तकाल पुरिसे अ ।
कारण पच्चय लक्खण नए समोआरणाणुमए ॥२४०॥

● दव्वे अद्ध अ अहाउय उवक्कमे देसकालकाले य ।
तह य पमाणे वण्णे भावे पगयं तु भावेणं ॥६६०॥

**( अव० )** पिण्डस्य=आहारस्य विधिः=दोषरहितत्वेन विशुद्धि-[1]स्तज्ज्ञाने सम्पूर्ण-कौशलवितरणासक्तां, **ललि०** सुकोमलानां पदानां श्रुतिः=श्रवणं तया मृष्टां=[2]मधुराम् । पिण्डनिर्युक्तिं वयमभिष्टुमः ॥६॥

**[ मू० ] प्रवचननाटकनान्दीप्रपञ्चितज्ञानपञ्चकसतत्त्वा ।**
**अस्माकममन्दतमं कन्दलयतु[1] नन्दिरानन्दम् ॥७॥** ( आर्या )

**( अव० ) प्रव०** प्रवचनं=जिनमतमेव नाटकं तत्र नान्दी= द्वादश-तूर्यनिर्घोषस्तन्मूलत्वान्नाटकस्य, प्रपञ्चितं=प्रकटीकृतं ज्ञानपञ्चकस्य= मति-श्रुतावधि-मनःपर्याय-केवलज्ञानरूपस्य सतत्त्वं=स्वरूपं यया । सा नन्दीरस्माकं अमन्दतमं=बहुतरं आनन्दं कन्दलयतु=वर्धयतु ॥७॥

**[ मू० ] अनुयोगद्वाराणि द्वाराणीवापुनर्भवपुरस्य ।**
**जीयासुः श्रुतसौधाधिरोहसोपानरूपाणि ॥८॥** ( आर्या )

**( अव० ) अनु०** श्रुतमेव सौधं=गृहं तदारोहे सोपानरूपाणि । अपुनर्भवपुरस्य= मोक्षनगरस्य द्वाराणीवाऽनुयोगद्वाराणि जीयासुः ॥८॥

**[ मू० ] अनवमनवमरससुधाह्रदिनीं षट्त्रिंशदुत्तराध्ययनीम् ।**
**अञ्चामि पञ्चचत्वारिंशतमृषिभाषितानि तथा ॥९॥** ( आर्या )

**( अव० ) अन०** अनवरमो=रम्यो यो नवमरसः=शान्ताख्यः[1] स एव सुधा=अमृतं तस्या ह्रदिनीं=नदीं **षट्त्रि०** षट्त्रिंशतद् यानि उत्तराणि=प्रधानान्यध्ययनानि ताम् । अहम् अञ्चामि=पूजयामि[2] । तथा पञ्चचत्वारिंशतं श्रीनेमि-श्रीपार्श्व-श्रीवीर-तीर्थवर्तिभिर्नारदादिभिः प्रणितानि अध्ययनविशेषान्(नि) ॥९॥

**[ मू० ] उच्चैस्तरोदञ्चितपञ्चचूड-**
**माचारमाचारविचारचारु ।**

**महापरिज्ञास्थनभोगविद्य-**
**माद्यं प्रपद्येऽङ्गमनङ्गजैत्रम् ॥१०॥** (इन्द्रवज्रा)

(**अव०**) **उच्चै०** आचारविचारचारु=योगाद्यनुष्ठानपूर्वं यथा स्यादेवम् । आचारप्रतिपादकत्वादाचारं नाम आद्यमङ्गम् अहं प्रपद्ये=श्रये किं विशिष्टं ? **उच्चै०** उच्चैस्तराः शब्दार्थाभ्यां अतिशायिन्यः उदञ्चिताः=प्रकटीकृताः पञ्चचूडा येन तत् उक्तशेषानुवादिनोऽधिकार विशेषाश्चूडासञ्ज्ञाः । पुनः किं विशिष्टं ? **महा०** महापरिज्ञानामाध्ययनं तत्रस्था आकाशगामिनी विद्या यस्यां, तत एवोद्धृत्य श्रीवज्रस्वामिना प्रभावना कृता ॥१०॥

[ **मू०** ] **त्रिषष्ठिसंयुक्तशतत्रयीमित-**
**प्रवादिदर्पाद्रिविभेदह्रादिनीम् ।**
**द्वयश्रुतस्कन्धमयं शिवश्रिये**
**कृतस्पृहः सूत्रकृताङ्गमाद्रिये ॥११॥** (इन्द्रवंशा)

(**अव०**) **त्रिष०** द्वयश्रुतस्कन्धमयं[१]=श्रुतस्कन्धद्वयरूपं सूत्रकृताङ्गं शिवश्रिये कृतस्पृहोऽहं आद्रिये=आश्रयामि । **किं विशिष्टं ? त्रिष०** त्रिषष्ठ्यधिकशतत्रयमितां प्रवादिनः क्रियावादिप्रभृतयः [२]यदुक्तं-

*असीससयं किरिआणं अकिरियवाईण होइ चूलसीई ।*
*अन्नाणीसत्तसट्ठी वेणइआणं य बत्तीसं ॥*
तेषां दर्पाद्रिविभिदे ह्रादिनीं=वज्रसमम् ॥११॥

[ **मू०** ] **स्थानाङ्गाय दशस्थानस्थापिताखिलवस्तुने ।**
**नमामि[१] कामितफलप्रदानसुरशाखिने ॥१२॥** (अनुष्टुप्)

(**अव०**) **स्थानां०** कामितफलप्रदानसुरशाखिने, तिष्ठन्ति प्रति-

पाद्यतया जीवादयः पदार्था इति स्थानान्यधिकारविशेषास्तथाहि—

*तओ इंदा पन्नत्ता-तं जहा देविंदे असुरिंदे मणुस्सिंदे ।*
*[स्थानांग ३-१(१२७)]*

*चत्तारि सूरा पन्नता तं जहा-खंतिसूरे तवसूरे दाणसूरे जुद्धसूरे[१] ।*
*[स्थानांग ४-१(३१७)]*

*पंचविहा अचित्तवाउकाइआ पन्नत्ता-तं जहा-अक्कंते धंते पीलिए सरिराणुमए[२] संमुत्थिए [(स्थानांग ५०३ (४४४)]*

*पंचहिं ठाणेहिं जीवा दुल्लहबोहिअत्ताए कम्मं पकरंति । तं जहा-अरहंताणं अवन्नं वयमाणे, अरहंतपण्णतस्स धम्मस्स, आयरियउवज्झायाणं, चाउवन्नस्स संघस्स[३], विविक्कतवबंभचेराणं अवन्नं वयमाणे ।*
*[(स्थानांग ५-२ (४२६)]*

*नवहिं ठाणेहिं रोगुप्पत्ति सिआ । अच्चासणाए अहिआसणाए अइनिद्दयाए अइजागरियाए उच्चानिरोहेणं पासवणनिरोहेण अद्धागमणेणं भोअणपडिकुलणयाए इंदियत्थकोवणयाए [(स्थानांग ९- (६६७)]*

*कहण्णं भंते जीवा सुहं कम्मं बंधंति ? । गोअमा ! सम्मद्दंसण-सुद्धीए, पसत्थमण-वयणकायजोएणं, इंदियनिग्गहेणं, कोहविजयेणं, धम्मसुक्कज्झाणेणं, आयरियउवज्झाय-[६]साहु-साहम्मिअभत्तीए, दाणसील-तवभावणप्पभावणाए, वेरग्गेणं, निस्संगेणं, संविभागेणं । [७]इच्चेइहिं दसहिं ठाणेहिं जीवा सुहं कम्मं बंधंति ।* इत्यादयः ।

एवमेतेषु दशस्थानेषु स्थापितान्यखिलवस्तुनि यत्र तस्मै स्थानाङ्गाय[८] अहं नमामि। ***विवक्षातः कारकाणि*** इति न्यायात् स्थानाङ्गायेति सम्प्रदानम् ॥१२॥

**[मू० ] तत्तत्सङ्ख्याविशिष्टार्थप्ररूपणपरायणम् ।**
**संस्तुमः समवायाङ्गं समवायैः स्तुतं सताम् ॥१३॥** (अनुष्टुप्)

**( अव० ) तत्त०** तास्ता एकादिदशान्ताः सङ्ख्यास्ताभिर्विशिष्टा ये अर्थास्तेषां प्ररूपणं=कथनम् । तत्र परायणं=तत्परं सतां समवायैः= समूहैः स्तुतं समवायाङ्गं[१] वयं संस्तुमः ॥१३॥

**[ मू० ] या षट्त्रिंशत्सहस्रान् प्रतिविधिसजुषां बिभ्रती प्रश्नवाचं,**
**चत्वारिंशच्छतेषु प्रथयति परितः श्रेणिमुद्देशकानाम् ।**
**रङ्गद्भङ्गोत्तरङ्गा नयगमगहना दुर्विगाहा विवाह-**
**प्रज्ञप्तिः पञ्चमाङ्गं जयति**
**भगवती सा विचित्रार्थकोशः ॥१४॥ ( स्रग्धरा )**

**( अव० ) या ष०** प्रतिविधिः=उत्तरं तेन सहितानां प्रश्नवाचां षट्त्रिंशत्सहस्रान् बिभ्रती=दधती या चत्वारिंशच्छतेषु अधिकारविशेषेषु, उद्देशकानां श्रेणिं परितः=सर्वतः प्रथयति । सा विवाहप्रज्ञप्तिनाम्नी पञ्चमाङ्गम्[१] । रङ्गन्तो ये भङ्गा रचना विशेषाः तैरूत्तङ्गा **उ०** कल्लोलाः नया=युक्तयो गमाः=सदृशपाठास्तैर्गहना= गुपिला, अकुशलैर्दुर्विगाहा । विचित्रार्थकोशो जयति । भगव(ती)ति[२] पूजाभिधानम्[३] ॥१४॥

**[ मू० ] कथानकानां यत्रार्द्धचतस्रः कोटयः स्थिताः ।**
**सोत्क्षिप्तादिज्ञातहृद्या ज्ञातधर्मकथा श्रिये ॥१५॥ ( अनुष्टुप् )**

**( अव० ) कथा०** यत्रार्द्धचतस्रः कथानकानां कोटयः स्थिताः सा ज्ञाताधर्मकथा नाम षष्ठमङ्गम् । उत्क्षिप्तादिभिर्ज्ञातैः=दृष्टान्तैर्हृद्या श्रियेऽस्तु ॥१५॥

**[ मू० ] आनन्दादिश्रमणोपासक-**
**दशकेतिवृत्तसुभगार्थाः[१] ।**

**विशदामुपासकदशा**
**भावद्दशं मम दिशन्तु सदा ॥१६॥ ( आर्या )**

**( अव० ) आनं०** आनन्दादयः श्रमणोपासकास्तेषां दशकं तस्य इतिवृत्तानि= चरितानि, तैः सुभगार्था उपासकदशानाममङ्गं विशदां भावद्दशं=ज्ञानं मम सदा दिशन्तु ॥१६॥

**[ मू० ] महत्त्रृषिमहासतीनां**
**गौतमपद्मावतीपुरोगाणाम्[१] ।**
**अधिकृतशिवान्तसुकृताः**
**स्मरतौच्चैरन्तकृद्दशाः कृतिनः ॥१७॥ ( आर्या )**

**( अव० ) मह०** गौतमपद्मावतीप्रमुखाणां महत्त्रृषिमहासतीनां अधिकृतानि= प्रकटितानि शिवान्तानि सुकृतानि यासु ता अन्तकृद्दशाः, हे ! कृतिन[१] ! उच्चैर्यूयं स्मरत ॥१७॥

**[ मू० ] गुणैर्यदध्ययनकलापकीर्तिता**
**अनुत्तराः प्रशमिषु जालिमुख्यकाः ।**
**अनुत्तरश्रियमभजन्ननुत्तरो-**
**पपातिकोपपददशाः श्रयामि ताः ॥१८॥ ( रुचिरा )**

**( अव० ) गुणै०** यदध्ययनकलापे कीर्तिताः=कथिताः प्रशमिषु =ऋषिषु गुणैश्चारित्रादिभिरनुत्तराः=प्रधाना जालिमुख्यकाः, जालि= नमिऋषिः स एव मुख्यो येषां ते जालिमुख्याः[१] । जालिमुख्या एव जालिमुख्यकाः, स्वार्थे कप्रत्ययः, अनुत्तराणि[२]= विजयादीनि पञ्च विमानानि तेषां श्रियम् अभजन् । अनुत्तरोपपातिकमिति उपपदं=पूर्वपदं यासां ता अनुत्तरोपपातिकदशाः अहं श्रयामि ॥१८॥

**[ मू० ] अङ्गुष्ठाद्यवतरदिष्टदेवतानां[1],**
**विद्यानां भवनमुदात्तवैभवानाम् ।**
**निर्णीतास्रवविधिसंवरस्वरूपाः,**
**प्रश्नव्याकरणदशा दिशन्तु शं नः ॥१९॥** ( प्रहर्षिणी )

**( अव० ) अङ्गु०** अङ्गुष्ठादिषु आदिशब्दाद्दीपजलादिषु अवतरो= अवतरणं तेन दिष्टाः= कथिता देवता यासाम् । तासाम् उदात्तवैभवानां= उत्कृष्टमहिम्नां विद्यानां भवनं=स्थानम् । आश्रवविधिः=कर्मपुद्गलादानं, संवरः=तन्निरोधः, निर्णीतं तयोः स्वरूपं यासु ताः प्रश्नव्याकरणदशा दशमाङ्गं नोऽस्माकम् शं=सुखं दिशन्तु ॥१९॥

**[ मू० ] ज्ञातैर्मृगापुत्र[1]सुबाहुवादिभिः**
**शासद्विपाकं सुखदुःखकर्मणाम् ।**
**द्विःपङ्क्तिसङ्ख्याध्ययनोपशोभितं**
**श्रीमद्विपाकश्रुतमस्तु नः श्रिये ॥२०॥** ( इन्द्रवज्रा )

**( अव० ) ज्ञातै०** मृगापुत्रसुबाहुवादिभिर्दृष्टान्तैः सुखदुःखकर्मणां विपाकं=परिणामं शासत्=शिक्षयत् ज्ञापयदित्यर्थः । केषां ? [1]भव्यजीवानामिति गम्यम् । **द्विःपं०** विंशत्यध्ययनालङ्कृतम् । श्रीमद्विपाकश्रुतमेकादशमाङ्गं नः श्रियेऽस्तु । सुबाहुवादिभिरित्यत्र[2] **इवर्णा**देरित्यनेन सूत्रेण (सि०हे० १।२।२१) परतो वत्त्वम्[3] (परमते) । एतान्येकादशाप्यङ्गानि श्रीसुधर्मास्वामिना रचितानि । अन्येषां गणभृतां पूर्वनिवृत्तत्वेन सर्वगणधर[4]शिष्याणां एतद्वाचनाग्रहणात्[5] । अत एवादौ श्रीसुधर्मा नमस्कृतः ॥२०॥

**[ मू० ] प्रणिधाय यत्प्रवृत्ता[1] शास्त्रान्तरवर्णनातिदेशततिः ।**
**नमतौपपातिकं तत्प्रकटयदुपपातवैचित्रीम् ॥२१॥** ( आर्या )

**( अव० ) प्रणि०** यत्प्रणिधाय=स्मृत्वा शास्त्रान्तरेषु पदार्थवर्णनातिदेशानां ततिः[१]= श्रेणिः प्रवृत्ता, अतिदेशो[२]=अन्यत्र विस्तरेण प्ररूपितस्य वस्तुनः सङ्क्षेपेण कथनम्, तद् औपपातिकम् आचाराङ्गोपाङ्गम् । **उप०** देवनरनारकाणाम्[३] उपपात=उत्पादस्तस्य वैचित्रीं प्रकटयत् । हे ! विद्वांसो यूयं नमत । आचाराङ्गस्य शस्त्रपरिज्ञाध्ययनाद्योद्देशके[४] **एवमेगेसिं नो नायं भवइ**[५] इत्यादि । अत्र सूत्रे यदौपपातिकत्वमात्मनो निर्दिष्टं तदत्र[६] प्रपञ्चत इत्यर्थः । अङ्गस्योप=समीपे उपाङ्गम् ॥२१॥

**[ मू० ] सूर्याभवैभवं विभावनदृष्टतीर्थ-**
**प्रश्नादनन्तरमिनाननिर्गतेन ।**
**केशिप्रदेशिचरितेन विराजिराज-**
**प्रश्नीयमिद्धमुपपत्तिशतैर्महामि ॥२२॥ ( वसंततिलका )**

**( अव० ) सूर्या०** सूर्याभदेवस्य वैभवं=ऋद्धिस्तस्य विभावनेन= ईक्षणेन दृष्टं[१] यत्तीर्थं=प्रथमगणधरश्चतुर्विधः सङ्घो[२] वा तस्य प्रश्नात्= पृच्छाया अनन्तरम् इनस्य=श्रीवीरस्य आननं=मुखं ततो निर्गतेन । केशी गणभृत् प्रदेशी च राजा तयोश्चरितेन विराजि=शोभि । **उप०** युक्तिशतैरिद्धं=दीप्तं राजप्रश्नीयं सूत्रकृदुपाङ्गमहं महामि । प्रदेशी केशिना प्रतिबोधितो देवत्वमाप्य श्रीवीरं वन्दितुं समवसृतौ गतः । तत्रात्यद्भुतं तस्य तेजो वीक्ष्य श्रीसङ्घेन प्रश्नः कृतः । सर्वेभ्यो देवेभ्यः[३] किमित्ययमुत्कृष्ट ?[४] इति ॥२२॥

**[ मू० ] जीवाजीवनिरूपि द्वेधा प्रतिपत्तिनवक[१]कमनीयम् ।**
**जीवाभिगमाध्ययनं ध्यायेमासुगमगमगहनम् ॥२३॥ ( आर्या )**

**( अव० ) जीवा०** जीवाजीवनिरूपिण्यो द्वेधा=द्विप्रकाराः प्रतिपत्तयो=युक्तयस्तासां[१] नवकं[२] तेन रम्यम् । असुगमा=विषमा ये गमास्तैर्गहनं जीवाभिगमाध्ययनं स्थानाङ्गोपाङ्गं ध्यायेम=ध्यायामः । जीवानामुपलक्षणादजीवानामप्यभिगमो[३]=ज्ञानं यत्र तत् ॥२३॥

**[ मू० ] षट्त्रिंशता पदैर्जीवाजीवभावविभावनीम्[१] ।**
**प्रज्ञापनां पनायामि श्यामार्यस्याऽमलं यशः ॥२४॥** ( आर्या )

**( अव० ) षट्०** षट्त्रिंशता पदैः=अधिकारैर्जीवाजीवभावप्ररूपिकां प्रज्ञापनां समवायाङ्गोपाङ्गं पनायामि[१]=स्तौमि । श्यामार्यस्य=कालिकाचार्यस्य अमलं यशस्तत्र तदधिकारात् ॥२४॥

**[ मू० ] विवृताद्यद्वीपस्थिति-**
**जिनजनिमहचक्रिदिग्विजयविधये ।**
**भगवति जम्बूदीप-**
**प्रज्ञप्ते ! तुभ्यमस्तु नमः[१] ॥२५॥** ( आर्या )

**( अव० ) विवृ०** हे ! भगवति ! जम्बूद्वीपप्रज्ञप्ते ! पञ्चमोपाङ्ग[१] ! । **विवृ०** विवृताः= प्रकटिता आद्यद्वीपस्य स्थितिर्जिनजन्ममहः[२] चक्रिणां दिग्विजयविधिश्च यया तस्यै तुभ्यं नमोऽस्तु ॥२५॥

**[ मू० ] प्रणमामि चन्द्रसूर्यप्रज्ञप्ती**
**यमलजातिके[१] नव्ये ।**
**गुम्फवपुषैव नवरं**
**नातिभिदाऽर्थात्मनापि[२] ययोः ॥२६॥** ( आर्या )

**( अव० ) प्रण०** चन्द्रसूर्यप्रज्ञप्ती=चन्द्रसूर्यविचारप्रतिपादिके यमलजातिके सहजाते, नवरं=केवलं गुम्फवपुषैव[१], गुम्फेनैव नव्ये= भिन्नग्रन्थरूपे अहं प्रणमामि । ययोरर्थात्मनाऽपि न अतिभिदा=भेदः,

अपिशब्दात्शब्दतोऽपि ॥२६॥

**[ मू० ] कालादिकुमाराणां महाहवारम्भसम्भृतैर्दुरितैः ।**
**दर्शितनरकातिथ्या निरयावलिका विजेषीरन्[1] ॥२७॥** ( आर्या )

**( अव० ) काला०** कालादिदशकुमाराणां चेटककोणि(क)वैरे[1] महाहवारम्भसम्भृतैः= महायुद्धारम्भोपार्जितैर्दुरितैः[2]=पापैर्दर्शितं नरका-तिथ्यं=नरकभवप्राप्तिर्याभिस्ता[3] निरयावलिका विजेषीरन्=विजयन्ताम् । तत्र कालादिकुमाराणां वर्णनात् ॥२७॥

**[ मू० ] पद्मादयः कल्पवतंसभूय-**
**मुपेयिवासः सुकृतैः शमीशाः ।**
**यत्रोदिताः श्रेणिकराजवंश्या**
**उपास्महे कल्पवतंसिकास्ताः ॥२८॥** ( उपेन्द्रवज्रा )

**( अव० ) पद्मा०** श्रेणिकराजवंश्याः पद्मादयः शमीशा=ऋषयः सुकृतैः कल्पवतंसभूयं=देवत्वं[1] उपेयिवासः=प्राप्ताः यत्रोदिताः=कथिताः, ताः कल्पवतंसिकाः वयम् उपास्महे ।

*सोहम्मीसाणकप्पजाणि[2] कप्पठाणाणि ताणि कप्पवडिंसयाणि तेसु जे जेण तवविसेसेण उववन्ना इड्ढि वा पत्ता सवित्थरं वन्निज्जंति ।* याभिर्ग्रन्थपद्धतिभिस्ताः कल्पाः ॥२८॥

**[ मू० ] चन्द्रसूर्यबहुपुत्रिकादिभि,**
**र्यत्र संयमविराधनाफलम् ।**
**भुज्यमानमगृणाद् गणाधिपः[1]**
**पुष्पिताः शमभिपुष्पयन्तु ताः ॥२९॥** ( रथोद्धता )

**( अव० ) चन्द्र०** यत्र संयमविराधनायाः फलं चन्द्रसूर्यौ राजानौ

पूर्वभवे गृहीतदीक्षौ, बहुपुत्रिकाऽनपत्या[१] पूर्वभवे प्रव्रजिता तदादिभि-र्भुज्यमानं गणाधिपोऽगृणात्= जगाद । ताः पुष्पिताः शं=सुखं अभिपुष्प-यन्तु=उत्फुल्लयन्तु । यत्र ग्रन्थेऽङ्गिनो गृहवासत्यागेन संयमभावपुष्पिता वर्णिताः ॥२९॥

**[ मू० ] श्रीह्रीप्रभृतिदेवीनां चरित्रं यत्र सूत्रितम्[१] ।**
**ताः सन्तु मे प्रसादानुकूलिकाः पुष्पचूलिकाः ॥३०॥** ( अनुष्टुप् )

**( अव० )** श्रीह्रीप्रभृतिदेवीनां चरित्रं=परिवारादिस्वरूपं यत्र सूत्रितं=कथितम् । ताः पुष्पचूलिका मे=मम प्रसादानुकूलिकाः[१]= प्रसादतत्पराः सन्तु ॥३०॥

**[ मू० ] वृष्णीनां निषधादीनां**
**द्वादशानां यशःस्त्रजः ।**
**पुष्णान्तु भक्तिनिष्णानां**
**दशां वृष्णिदशाः शुभाम् ॥३१॥** ( अनुष्टुप् )

**( अव० ) वृष्णी०** निषधादीनां राज्ञां वृष्णीनां=अन्धकवृष्णि-गोत्रजानां द्वादशानां यशःस्त्रजो=यशोमाला इव वृष्णिदशा भक्तिपराणां[१] शुभां दशां पुष्णन्तु ॥३१॥

**[ मू० ] वन्दे मरणसमाधिं प्रत्याख्याने महातुरोपपदे ।**
**संस्तारचन्द्रवेध्यकभक्तपरिज्ञाचतुःशरणम् ॥३२॥** ( आर्या )

**( अव० )** नन्द्यनुयोगद्वारयोः पूर्वं कथनादार्याद्वयेन त्रयोदश-प्रकीर्णकानि स्तौति । **वन्दे०** अहं वन्दे मरणसमाधिं महा इति आतुर इति उपपदे ययोस्ते महाप्रत्याख्यान-आतुरप्रत्याख्याने संस्तार-चन्द्रवेध्यक-भक्तपरिज्ञा-चतुःशरणं समाहारः ॥३२॥

**[ मू० ] वीरस्तवदेवेन्द्रस्तवगच्छाचारमपि च गणिविद्या ।**
**द्वीपाब्धिप्रज्ञप्तिं तन्दुलवैचारिकं च नुमः ॥३३॥** ( आर्या )

**( अव० ) वीर०** वीरस्तवः देवेन्द्रस्तवः गच्छाचारम् अपि च गणिविद्यां द्विपाब्धिप्रज्ञप्तिः तन्दुलवैचारिकं[१] च वयं नुमः । सर्वेषां नामार्थाः पाक्षिकसूत्रावचूर्णौ सन्ति ॥३३॥

**[ मू० ] शिवाध्वदीपायोद्धातानुद्धातारोपणात्मने ।**
**चित्रोत्सर्गापवादाय निशीथाय नमो नमः[१] ॥३४॥** ( अनुष्टुप् )

**( अव० ) शिवा०**=मोक्षमार्गदीपाय **उद्धा०** उद्धातो=गुरु-प्रायश्चित्तविशेषः । अनुद्धातस्तु तद्विपरीतो लघुरित्यर्थः, तयोरारोपणम्=उचितस्थाने प्रयोजनम् । तदेव आत्मा=स्वरूपं यस्य तस्मै उद्धाता-ऽनुद्धातारोपणात्मने[१] । चित्रा=विविधा उत्सर्गापवादा[२] यत्र, उत्सर्गो=मुख्यमार्गः अपवादः=कारणे[३] प्रतिषिद्धसेवा । तस्मै निशीथं=मध्य-रात्रस्तद्वद्रहोभूतं यदध्ययनं तन्निशीथं तस्मै निशीथाय आचाराङ्गपञ्चम-चूडायै नमो नमः वीप्सायां द्वित्वम्[४] ॥३४॥

**[ मू० ] निर्युक्तिभाष्यप्रमुखैर्निबन्धैः**
**सहस्रशाखीकृतवाच्यजातम् ।**
**दशाश्रुतस्कन्धमनात्तगन्धं**
**परैः सकल्पव्यवहारमीडे ॥३५॥** ( उपजातिः )

**( अव० ) निर्यु०** निर्युक्तिभाष्यप्रमुखैर्निबन्धैः ग्रन्थैः[१] सहस्र-शाखीकृतं=विस्तारितं वाच्यजातं यत्र । तं दशाध्ययनानां श्रुतस्कन्धं दशाश्रुतस्कन्धं परैः=परमतिभिरनात्तगन्धम् । कल्पः=साध्वाचारस्तत्प्रति-पादको ग्रन्थोऽपि कल्पः । व्यवहारः प्रतीतार्थस्तत्प्रतिपादकग्रन्थोऽपि व्यवहारस्ताभ्यां सह वर्तते यः स[२] सकल्पव्यवहारस्तं ईडे=स्तुवे ॥३५॥

**[ मू० ] षट्सप्तपङ्क्तिविंशति-**
**षट्गुणसप्तप्रकारकल्पानाम् ।**
**विस्तारयिता कल्पित**
**फलदः स्तात् पञ्चकल्पो नः ॥३६॥** ( आर्या )

**( अव० ) षट्०** षट् सप्त पङ्क्तिर्दश विंशतिः षड्गुणद्विसप्त=द्विचत्वारिंशत्प्रकारा ये कल्पास्तेषाम् । विस्तारयिता पञ्चकल्पो नोऽस्माकं कल्पितफलदो=वाञ्छितफलदः[१] स्तात् ॥३६॥

**[ मू० ] लेभे यद्व्यवहारेणाधुनान्त्येनापि[१] मुख्यताम् ।**
**तं जीतकल्पमाकल्पकल्पं[२] तीर्थश्रियः श्रये[३] ॥३७॥** ( आर्या )

**( अव० ) लेभे०** अन्त्येनापि यद्व्यवहारेण=यदाचारेण[१] अधुना मुख्यतां लेभे । एतदाधारेणैव प्रायश्चित्तविधिप्रवृत्तेः । तं जीतकल्पं तीर्थश्रियः=शासनरमाया आकल्पकल्पं= वेषतुल्यं श्रये । व्यवहाराः पञ्च आगमः, श्रुतम्, आज्ञा, धारणा, जीतं चेति सन्ति । यदुक्तं व्यवहारे[१]—

*आगममाईओ जओ ववहारो पंचहा विणिद्दिट्ठो ।*
*आगमसुअआणा[१]धारणा य जीए अ पंचमए ।*

एवं जीतव्यवहारोऽन्त्यः[२] ॥३७॥

**[ मू० ] अञ्चामि पञ्चघ्ननवप्रमाणा-**
**चामाम्लसाध्यं कुमतैरबाध्यम् ।**
**महानिशीथं महिमौषधीनां**
**निशीथिनीशं शिववीथिभूतम् ॥३८॥** ( उपजातिः )

---

१. व्यवहारसूत्रे - पंचविहे ववहारे पण्णत्ते तं जहा-आगमे सुए आणा धारणा जीए । (३.१०.२१.५) इयं गाथा पञ्चाशके दृश्यते ।

**( अव० ) अञ्चा०** पञ्चघ्ननवभिः=पञ्चत्वारिंशत्प्रमाणैराचाम्लैः निर्यूढयोगं[१] साध्यं कुमतैरबाध्यम् । **महि०** महिमा एव औषधयस्तासाम् । **निशी०** चन्द्रं, वृद्धिप्रापकत्वात् । **शिव०** मोक्षमार्गभूतं महानिशीथं अञ्चामि=पूजयामि ॥३८॥

**[ मू० ] निर्युक्तिभाष्यवार्तिक-**
**सङ्ग्रहणी[१]चूर्णिटिप्पनकटीकाः ।**
**सर्वेषामप्येषां**
**चेतसि निवसन्तु[२] नः सततम् ॥३९॥** ( आर्या )

**( अव० ) निर्यु०** निर्युक्तिः=सूत्रोक्तार्थभेदप्ररूपिका, भाष्यं= सूत्रोक्तार्थप्रपञ्चकं, वार्तिकं=उक्तानुक्तदुरूक्तार्थानां चिन्ताकारि, सङ्ग्रहणी= सूत्रोक्तार्थ[१]सङ्ग्राहिका, चूर्णिः=अवचूर्णिः, टिप्पनकं= विषमपदव्याख्या, टीका=निरन्तरव्याख्या एताः । एषां सर्वेषामपि पूर्वोक्तग्रन्थानाम्, नश्चेतसि सततं निवसन्तु ॥३९॥

**[ मू० ] परिकर्म-सूत्र-पूर्वानुयोग-**
**पूर्वगत-चूलिकाभेदम् ।**
**ध्यायामि दृष्टिवादं कालिक-**
**मुत्कालिकं श्रुतं चान्यत् ॥४०॥** ( आर्या )

**( अव० ) परि०** परिकर्मः सप्रभेदः । सूत्राणि द्वाविंशतिभेदानि । पूर्वानुयोगो द्विधा प्रथमानुयोगः कालानुयोगश्च । प्रथमे २४ (चतुर्विंशति) जिन १२ (द्वादश) चक्रिदशाचरित्राणि, कालानुयोगेऽष्टाङ्गनिमित्तम् । पूर्वाणि सर्वाङ्गेभ्योऽर्थतो जिनैः शब्दतो गणधरैश्च पूर्वं रचितत्वात् पूर्वाणि[१] चतुर्दशापि पूर्वगतम् । चूलिका उक्तशेषवाच्याः । एते पञ्चभेदा यस्य तं दृष्टयो=दर्शनानि तासां वदनं दृष्टिवादस्तं ध्यायामि[२] । च=पुनरन्यत्

कालिकमागाढयोगाराध्यं उत्कालिकमनागाढयोगसाध्यं ध्यायामि । श्रुतं हि द्विधा अङ्गप्रविष्टमनङ्गप्रविष्टं च । तत्र

**पायदुगं २ जंघोरू ६ गायदुगद्धं ८ च दो अ बाहू अ १० ।**
**गीवा ११ सिरं १२ च पुरिसो बारसअंगो सुअविसुद्धो ॥**

गात्रद्विकार्द्धं=पृष्ठोदररूपम्, एवंविधश्रुतपुरुषस्य अङ्गेषु व्यवस्थितं अङ्गप्रविष्टम् । तथाहि—प्रवचनपुरुषस्य पादयुग्मं आचाराङ्गसूत्रकृताङ्गे[३] जङ्घे स्थानाङ्गसमवायाङ्गे इत्यादि । अथवा

**गणहरकयमंगगयं[४] जं कय[५] थेरेहिं बाहिरं तं तु ।**
**निअयं अंगपविट्ठं अणिअय सुअबाहिरं भणिअं ॥**

**[ मू० ] यस्याभवन्त्यवितथा**
**अद्याप्येकोनषोडशादेशाः ।**
**सा भगवती प्रसीदतु**
**ममाङ्गविद्याऽनवद्यविधि[१]साध्या ॥४१॥** ( आर्या )

**( अव० ) यस्या०** यस्या अद्यापि एकोनषोडशाः=पञ्चदश आदेशाः स्वप्नादिषु अतीतानागतवर्तमानकथनानि अवितथाः=सत्याः भवन्ति । सा अङ्गविद्या भगवती अनवद्यविधिसाध्या मम प्रसीदतु ॥४१॥

**[ मू० ] वन्दे विशेषणवतीं सम्मतिनयचक्रवालतत्त्वार्थान् ।**
**ज्योतिष्करण्ड-सिद्धप्राभृत-वसुदेवहिण्डीश्च ॥४२॥** ( आर्या )

**( अव० ) वन्दे०** विशेषणवतीं सम्मति-नयचक्रवाल-तत्त्वार्थान् । ज्योतिष्करण्ड-सिद्धप्राभृतवसुदेवहिण्डीश्च[१] एतान् ग्रन्थान् अहं वन्दे ॥४२॥

**[ मू० ] कर्मप्रकृतिप्रमुखाण्य-**
**पराण्यपि पूर्वसूरिरचितानि ।**

**समयसुधाम्बुधिपृषतान्**
**परिचिनुमः प्रकरणानि चिरम् ॥४३॥** (आर्या)

**(अव०) कर्म०** कर्मस्वरूपप्रतिपादको ग्रन्थः कर्मप्रकृतिः । तत्प्रमुखानि अपराण्यपि अनुक्तानि पूर्वसूरिरचितानि प्रकरणानि चिरं परिचिनुमः सुपरिचितानि कुर्मः **सम०** सिद्धान्तोदधिबिन्दुप्रायाणि ॥४३॥

**[मू०] व्याकरणछन्दोऽलङ्कृति-**
**नाटक-काव्य-तर्क-गणितादि ।**
**सम्यग्दृष्टिपरिग्रह-**
**पूतं जयति श्रुतज्ञानम् ॥४४॥** (आर्या)

**(अव०) = व्याक०** व्याकरण-छन्दोऽलङ्कृति-नाटक-काव्य-तर्क-गणितादि मिथ्यादृग्भिः कृतमपि[१] सम्यग्दृष्टयो=जैनास्तैः[२] परिग्रहः=स्वीकृतिस्तया पूतं श्रुतज्ञानं[३] जयति ॥४४॥

**[मू०] सर्वश्रुताभ्यन्तरगां कृतैन-**
**स्तिरस्कृतिं पञ्चनमस्कृतिं च ।**
**तीर्थप्रवृत्तेः प्रथमं निमित्त-**
**माचार्यमन्त्रं च नमस्करोमि ॥४५॥** (उपजातिः)

**(अव०) = सर्व०** कृतपापतिरस्कारां **सर्व०** सर्वसिद्धान्त-मध्यगां[१] पञ्चनमस्कृतिं= पञ्चनमस्कारम् । **तीर्थ०** शासनप्रवृत्तेः प्रथमं निमित्तं आचार्यमन्त्रं च नमस्करोमि[२] ॥४५॥

**[मू०] इति भगवतः सिद्धान्तस्य प्रसिद्धफलप्रथां,**
**गुणगणकथां कण्ठे कुर्याज्जिनप्रभवस्य यः ।**

**वितरतितरां तस्मै तोषाद्वरं[१] श्रुतदेवता,**
**स्पृहयति च सा मुक्तिश्रीस्तत्समागमनोत्सवम् ॥४६॥**

**( हरिणी । )**

**( अव० ) इति०** इति=अमुना प्रकारेण भगवतः सिद्धान्तस्य जिनप्रभवस्य= जिनप्रणीतस्य, यः=**पुरुषो गुण०** गुणा=देवेन्द्रोपपाता-ध्ययनपठनेन देवेन्द्र एति, उत्थानश्रुतेन सङ्घादिकार्ये ग्राम उद्वास्यते, समुत्थानश्रुतेन[१] पुनर्वास्यते, ईदृशमाहात्म्यादयस्तेषां गणः=समूहस्तस्य कथा=जल्पनम्। एतत्स्तवरूपां कण्ठे कुर्यात्=पठति। कथम्भूतां ? **प्रसिद्ध०** प्रसिद्धाः=सर्वविद्भिर्ज्ञाताः फलानां=यथा कुत्रचिन्नगरे बहुपद्मपरिवृतं महापुण्डरीकं देवताधिष्ठितं सरस्यास्ते । तच्च केनापि ग्रहीतुं न शक्यते । राज्ञोक्तं-'एतदानयति तद्धर्ममहं प्रतिपद्ये' इति । तदा परतीर्थिकैरुप-क्रमेणाप्यादानाशक्तैर्मन्त्रिणा जैनर्षिराकारितः तेन च सचितजलास्पर्शिना त्रिः प्रदक्षिणीकृत्य पालिस्थैनैव '**उप्पाहि[२] पुण्डरीआ**' इत्यादि पुण्डरीकाध्ययनं पेठे । ततस्तत्पुण्डरीकमुत्प्लुत्य[३] राज्ञोऽङ्के पपात । तदनु सपरिकरो राजा जैनोऽजनि । इत्यादीनां प्रथा=विस्तारो यस्यास्तां प्रसिद्धफलप्रथाम् । तस्मै तोषात् श्रुतदेवता वरं वितरति=दत्ते। सा मुक्तिश्रीस्तत्समागमनोत्सवं स्पृहयति । अत्र पूर्वार्द्धे जिनप्रभवस्येति सिद्धान्तविशेषणेन कविरौद्धत्यपरिहाराय गुप्तं **जिनप्रभेति** स्वनामाभिहितवान् इति ॥४६॥

**आदिगुप्ताभिधानस्य गुरोः पादप्रसादतः ।**
**पदविच्छेदरूपेयं विवृतिर्लिखिता मिता ॥**

**टी० A प्रत पुष्पिकाः मूल**–इतिश्री सिद्धान्तस्तवनं समाप्तं । संवत् १५१४ वर्षे फा० शु० १५ दिने चम्पावती नगर्यां तपागच्छाधिराजश्रीश्रीश्रीसोमसुन्दरसूरि–शिष्याधिराजश्रीविशालराजसूरिशिष्य–शिरोरत्नपूज्य पं० मेरूरत्नगणिशिष्येणाऽलेखि ॥

**अवचूरिः**– इति भट्टारकप्रभुश्रीविशालराजसूरिशिष्य पं० सोमोदयगणिकृता श्रीसिद्धान्तस्तवावचूर्णिः संवत् १५१४ वर्षे चैत्रवदि १ दिने श्रीगुरू पं० श्री श्रीश्रीमेरूरत्नगणिशिष्यभुजिष्य सिद्धान्तसुन्दरेणाऽलेखि ॥ छ ॥

**'B' प्रत पुष्पिकाः अव०** इतिश्री सिद्धान्तस्तवावचूरिः ॥ ग्रंथाग्रं २२५ ॥ छ ॥

**'C' प्रत पुष्पिकाः मूल०** संवत् १५१८ वर्षे १६३ दिने भट्टारक प्रभु
श्री श्री श्री सोमदेवसूरि पादशिष्येण लेखि परोपकाराय ।
**अव०** इति श्री सिद्धान्तस्तवावचूर्णिः ॥ छ ॥

**'D' प्रत पुष्पिकाः अव०** इतिश्री सिद्धान्तस्तवचूर्णिः ॥ छ ॥

• • •

## परिशिष्ट-१ मूलम्
# सिद्धान्तस्तवः

नत्वा गुरुभ्यः श्रुतदेवतायै सुधर्मणे च श्रुतभक्तिनुन्नः ।
निरुद्धनानावृजिनागमानां जिनागमानां स्तवनं तनोमि ॥१॥

सामायिकादिक-षडध्ययन-स्वरूपमावश्यकं शिवरमावदनात्मदर्शम् ।
निर्युक्ति-भाष्य-वर-चूर्णि-विचित्रवृत्ति-स्पष्टीकृतार्थनिवहं हृदये वहामि ॥२॥

युक्तिमुक्तास्वातिनीरं प्रमेयोर्मिमहोदधिम् ।
विशेषावश्यकं स्तौमि महाभाष्यापराह्वयम् ॥३॥

दशवैकालिकं मेरुमिव रोचिष्णुचूलिकम् ।
प्रीतिक्षेत्रं सुमनसां सत्कल्याणमयं स्तुमः ॥४॥

उद्यामुपोद्घातविकल्पकालभेदप्रभेदप्रतिभेदरूपाम् ।
मिताभिधानाममिताभिधेयां स्तौम्योघनिर्युक्तिममोघयुक्तिम् ॥५॥

पिण्डविधिप्रतिपत्तावखण्डपाण्डित्यदानदुर्ललिताम् ।
ललितपदश्रुतिमृष्टामभिष्टुमः पिण्डनिर्युक्तिम् ॥६॥

प्रवचननाटकनान्दीप्रपञ्चितज्ञानपञ्चकसतत्त्वा ।
अस्माकममन्दतमं कन्दलयतु नन्दिरानन्दम् ॥७॥

अनुयोगद्वाराणि द्वाराणीवापुनर्भवपुरस्य ।
जीयासुः श्रुतसौधाधिरोहसोपानरूपाणि ॥८॥

अनवमनवमरससुधाह्लादिनीं षट्त्रिंशदुत्तराध्ययनीम् ।
अञ्चामि पञ्चचत्वारिंशितमृषिभाषितानि तथा ॥९॥

उच्चैस्तरोदञ्चितपञ्चचूडमाचारमाचारविचारचारु ।
महापरिज्ञास्थनभोगविद्यमाद्यं प्रपद्येऽङ्गमनङ्गजैत्रम् ॥१०॥

त्रिषष्ठिसंयुक्तशतत्रयीमितप्रवादिदर्पाद्रिविभेदह्लादिनीं ।
द्वयश्रुतस्कन्धमयं शिवश्रिये कृतस्पृहः सूत्रकृतं गमाद्रिये ॥११॥

स्थानाङ्गाय दशस्थानस्थापिताखिलवस्तुने ।
नमामि कामितफलप्रदानसुरशाखिने ॥१२॥

तत्तत्सङ्ख्याविशिष्टार्थप्ररूपणपरायणम् ।
संस्तुमः समवायाङ्गं समवायैः स्तुतं सताम् ॥१३॥

या षट्त्रिंशत्सहस्रान् प्रतिविधिसजुषां बिभ्रती प्रश्नवाचं,
चत्वारिंशच्छतेषु प्रथयति परितः श्रेणिमुद्देशकानाम् ।
रङ्गद्भङ्गोत्तरङ्गा नयगमगहना दुर्विगाहा विवाह-
प्रज्ञप्तिः पञ्चमाङ्गं जयति भगवती सा विचित्रार्थकोशः ॥१४॥

कथानकानां यत्रार्द्धचतस्त्रः कोटयः स्थिताः ।
सोत्क्षिप्तादिज्ञातहृद्या ज्ञातधर्मकथा श्रिये ॥१५॥

आनन्दादिश्रमणोपासकदशकेतिवृत्तसुभगार्थाः ।
विशदामुपासकदशा भावद्दशं मम दिशन्तु सदा ॥१६॥

महत्रृषिमहासतीनां गौतमपद्मावतीपुरोगाणाम् ।
अधिकृतशिवान्तसुकृताः स्मरतौच्चैरन्तकृद्दशाः कृतिनः ॥१७॥

गुणैर्यदध्ययनकलापकीर्तिता अनुत्तराः प्रशमिषु जालिमुख्यकाः ।
अनुत्तरश्रियमभजन्ननुत्तरोपपातिकोपपददशाः श्रयामि ताः ॥१८॥

अङ्गुष्ठाद्यवतरदिष्टदेवतानां, विद्यानां भवनमुदात्तवैभवानाम् ।
निर्णीतास्त्रवविधिसंवरस्वरूपाः, प्रश्नव्याकरणदशा दिशन्तु शं नः ॥१९॥

ज्ञातैर्मृगापुत्रसुबाहुवादिभिः शासद्विपाकं सुखदुःखकर्मणाम् ।
द्विःपङ्क्तिसङ्ख्याध्ययनोपशोभितं श्रीमद्विपाकश्रुतमस्तु नः श्रिये ॥२०॥

प्रणिधाय यत्प्रवृत्ता शास्त्रान्तरवर्णनातिदेशततिः ।
नमतौपपातिकं तत्प्रकटयदुपपातवैचित्रीम् ॥२१॥

सूर्याभवैभवं विभावनदृष्टतीर्थप्रश्नादनन्तरमिनाननिर्गतेन ।
केशिप्रदेशिचरितेन विराजि राज-प्रश्नीयमिद्धमुपपत्तिशतैर्महामि ॥२२॥

जीवाजीवनिरूपि द्वेधा प्रतिपत्तिनवककमनीयम् ।
जीवाभिगमाध्ययनं ध्यायेमासुगमगमगहनम् ॥२३॥

षट्त्रिंशता पदैर्जीवाजीवभवविभावनीम् ।
प्रज्ञापनां पनायामि श्यामार्यस्याऽमलं यशः ॥२४॥

विवृताद्यद्वीपस्थितिजिनजनिमहचक्रिदिग्विजयविधये ।
भगवति जम्बूदीपप्रज्ञप्ते ! तुभ्यमस्तु नमः ॥२५॥

प्रणमामि चन्द्रसूर्यप्रज्ञप्ती यमलजातिके नव्ये ।
गुम्फवपुषैव नवरं नातिभिदाऽर्थात्मनापि ययोः ॥२६॥

कालादिकुमाराणां महाहवारम्भसम्भृतैर्दुरितैः ।
दर्शितनरकातिथ्या निरयावलिका विजेषीरन् ॥२७॥

पद्मादयः कल्पवतंसभूयमुपेयिवासः सुकृतैः शमीशाः ।
यत्रोदिताः श्रेणिकराजवंश्या उपास्महे कल्पवतंसिकास्ताः ॥२८॥

चन्द्रसूर्यबहुपुत्रिकादिभिर्यत्र संयमविराधनाफलम् ।
भुज्यमानमगृणाद् गणाधिपः पुष्पिताः शमभिपुष्पयन्तु ताः ॥२९॥

श्रीह्रीप्रभृतिदेवीनां चरित्रं यत्र सूत्रितम् ।
ताः सन्तु मे प्रसादानुकूलिकाः पुष्पचूलिकाः ॥३०॥

वृष्णीनां निषधादीनां द्वादशानां यशःस्त्रजः ।
पुष्णन्तु भक्तिनिष्णानां दशां वृष्णिदशाः शुभाम् ॥३१॥

वन्दे मरणसमाधिं प्रत्याख्याने महातुरोपपदे ।
संस्तारचन्द्रवेध्यकभक्तपरिज्ञाचतुःशरणम् ॥३२॥

वीरस्तवदेवेन्द्रस्तवगच्छाचारमपि च गणिविद्या ।
द्वीपाब्धिप्रज्ञप्तिं तन्दुलवैचारिकं च नुमः ॥३३॥

शिवाध्वदीपायोद्घातानुद्घातारोपणात्मने ।
चित्रोत्सर्गापवादाय निशीथाय नमो नमः ॥३४॥

निर्युक्तिभाष्यप्रमुखैर्निबन्धैः सहस्त्रशाखीकृतवाच्यजातम् ।
दशाश्रुतस्कन्धमनात्तगन्धं परैः सकल्पव्यवहारमीडे ॥३५॥

षट्-सप्त-पङ्क्ति-विंशति-षट्गुणसप्त-प्रकारकल्पानाम् ।
विस्तारयिता कल्पितफलदः स्तात् पञ्चकल्पो नः ॥३६॥

लेभे यद्व्यवहारेणाधुनान्त्येनापि मुख्यता ।
तं जीतकल्पमाकल्पकल्पं तीर्थश्रियः श्रये ॥३७॥

अञ्चामि पञ्चघ्ननवप्रमाणाचामाम्लसाध्यं कुमतैरबाध्यम् ।
महानिशीथं महिमौषधीनां निशीथिनीशं शिववीथिभूतम् ॥३८॥

निर्युक्तिभाष्यवार्तिकसङ्ग्रहणीचूर्णिटिप्पनकटीकाः ।
सर्वेषामप्येषां चेतसि निवसन्तु नः सततम् ॥३९॥

परिकर्मसूत्रपूर्वानुयोगपूर्वगतचूलिकाभेदम् ।
ध्यायामि दृष्टिवादं कालिकमुत्कालिकं श्रुतं चान्यत् ॥४०॥

यस्या भवन्त्यवितथा अद्याप्येकोनषोडशादेशाः ।
सा भगवती प्रसीदतु ममाङ्गविद्याऽनवद्यविधिसाध्या ॥४१॥

वन्दे विशेषणवतीं सम्मतिनयचक्रवालतत्त्वार्थान् ।
ज्योतिष्करण्ड-सिद्धप्राभृत-वसुदेवहिण्डीश्च ॥४२॥

कर्मप्रकृतिप्रमुखाण्यपराण्यपि पूर्वसूरिरचितानि ।
समयसुधाम्बुधिपृषतान् परिचिनुमः प्रकरणानि चिरम् ॥४३॥

व्याकरणछन्दोऽलङ्कृति-नाटक-काव्य-तर्क-गणितादि ।
सम्यग्दृष्टिपरिग्रहपूतं जयति श्रुतज्ञानम् ॥४४॥

सर्वश्रुताभ्यन्तरगां कृतैनस्तिरस्कृतिं पञ्चनमस्कृतिं च ।
तीर्थप्रवृत्तेः प्रथमं निमित्तमाचार्यमन्त्रं च नमस्करोमि ॥४५॥

इति भगवतः सिद्धान्तस्य प्रसिद्धफलप्रथां,
गुणगणकथां कण्ठे कुर्याज्जिनप्रभवस्य यः ।
वितरतितरां तस्मै तोषाद्वरं श्रुतदेवता,
स्पृहयति च सा मुक्तिश्रीस्तत्समागमनोत्सवम् ॥४६॥

• • •

परिशिष्ट-२

## श्लोकानुक्रमणिका


| श्लोकः | श्लोकाङ्कः |
|---|---|
| अङ्गुष्ठाद्यवतरदिष्टदेवतानां विद्यानां.... | १९ |
| अञ्चामि पञ्चघ्ननवप्रमाणाचामाम्लसाध्यं.... | ३८ |
| अनुयोगद्वाराणि.... | ८ |
| अनवमनवमरससुधाह्लदिनीं.... | ९ |
| आनन्दादिश्रमणोपासक.... | १६ |
| इति भगवतः सिद्धान्तस्य.... | ४६ |
| उच्चैस्तरोदञ्चितपञ्चचूडमाचारमाचार.... | १० |
| उद्यामुपोद्धातविकल्पकाल.... | ५ |
| कथानकानां यत्रार्द्धचतस्रः.... | १५ |
| कर्मप्रकृतिप्रमुखाण्यपराण्यपि.... | ४३ |
| कालादिकुमाराणां.... | २७ |
| गुणैर्यदध्ययनकलापकीर्तिता.... | १८ |
| चन्द्रसूर्यबहुपुत्रिकादिभिर्यत्र.... | २९ |
| जीवाजीवनिरूपि द्वेधा.... | २३ |
| ज्ञातैर्मृगापुत्रसुबाहुवादिभिः शासद्विपाकं.... | २० |
| तत्तत्सङ्ख्याविशिष्टार्थप्ररूपण.... | १३ |
| त्रिषष्ठिसंयुक्तशतत्रयीमितप्रवादिदर्पाद्रि.... | ११ |
| दशवैकालिकं.... | ४ |
| नत्वा गुरुभ्यः श्रुतदेवतायै.... | १ |
| निर्युक्तिभाष्यप्रमुखैर्निबन्धैः.... | ३५ |
| निर्युक्तिभाष्यवार्तिकसङ्ग्रहणी.... | ३९ |

| | |
|---|---|
| पद्मादयः कल्पवतंसभूयमुपेयिवासः.... | २८ |
| परिकर्मसूत्रपूर्वानुयोग.... | ४० |
| पिण्डविधिप्रतिपत्तावखण्डपाण्डित्य.... | ६ |
| प्रणिधाय यत्प्रवृत्ता.... | २१ |
| प्रणमामि चन्द्रसूर्यप्रज्ञप्ती.... | २६ |
| प्रवचननाटकनान्दीप्रपञ्चित.... | ७ |
| महऋषिमहासतीनां.... | १७ |
| यस्या भवन्त्यवितथा.... | ४१ |
| या षट्त्रिंशत्सहस्त्रान् प्रतिविधिसजुषां.... | १४ |
| युक्तिमुक्तास्वातिनीरं.... | ३ |
| लेभे यद्व्यवहारेणा.... | ३७ |
| वन्दे मरणसमाधिं.... | ३२ |
| वन्दे विशेषणवतीं.... | ४२ |
| विवृताद्यद्वीपस्थिति.... | २५ |
| वीरस्तवदेवेन्द्रस्तवगच्छाचारमपि.... | ३३ |
| वृष्णीनां निषधादीनां.... | ३१ |
| व्याकरणछन्दोऽलङ्कृति-नाटक.... | ४४ |
| शिवाध्वदीपायोद्घातनुद्घातारोपणात्मने.... | ३४ |
| श्रीह्रीप्रभृतिदेवीनां चरित्रं.... | ३० |
| षट्त्रिंशता पदैर्जीवाजीव.... | २४ |
| षट्सप्तपङ्क्तिविंशतिषट्गुण.... | ३६ |
| सर्वश्रुताभ्यन्तरगां कृतैनस्तिरस्कृतिं.... | ४५ |
| सामायिकादिक-षडध्ययन.... | २ |
| सूर्याभवैभवं विभावनदृष्टतीर्थ-.... | २२ |
| स्थानाङ्गाय दशस्थानस्थापिता.... | १२ |

परिशिष्ट-३

## उद्धरणस्थलसङ्केतः

| श्लोकः | श्लोक क्रमाङ्कः | स्थानम् |
|---|---|---|
| आगममाइओ | ३७ | व्यवहार, ( पञ्चाशक ७७० ) |
| इवर्णादे | २० | सिद्धहेम. १।२।२१ |
| इह खलु. | ४ | दशवैकालिक चूलिका-१ |
| उद्देसे निद्देसे | ५ | आवश्यकनिर्युक्ति १४० |
| उप्पाहि पुंडरिआ | ४६ | |
| कहण्णं भंते जीवा सुहकम्मं | १२ | स्थानांग ( ? ) |
| गणहरकयं | ४० | नन्दीसूत्र हारि. वृत्ति ७९ |
| चत्तारि सूरा पण्णत्ता | १२ | स्थानांग ४-३१७ |
| चुलिअं तु | ४ | दशवैकालिक चूलिका २ |
| तओ इंदा पण्णत्ता | १२ | स्थानांग ३-१( १२७ ) |
| दव्वे अद्ध | ५ | आवश्यकनिर्युक्ति-६६० |
| नवहिं ठाणेहिं रोगुप्पत्ति | १२ | स्थानांग ९-६६७ |
| पंचहिं ठाणेहिं जीवा दुल्लहबोहि | १२ | स्थानांग ५-२-४२६ |
| पंचहिं अचित्तवाउकाइआ | १२ | स्थानांग ५-३-४४४ |
| पायदुगं जंघोरु | ४० | नन्दीसूत्र हारि. वृत्ति ७९ |
| विवक्षातः कारकाणि | १२ | न्यायसङ्ग्रहः ११ |
| सोहम्मीसाण | २८ | नन्दीसूत्र हारि. वृत्ति ८४ |

• • •

# परिशिष्ट-४
# सर्वसिद्धान्तस्तवः (पाठान्तर)

| का.स्थ. | टि. A प्रत | B प्रत | C प्रत | D प्रत |
|---|---|---|---|---|
| १ मू. | १ नुन्नः | तनुः | | |
| १ प्रस्ता. | १ देवी | इति नास्ति । | | |
| १ प्रस्ता. | २ उपदीकृता | उपपदीकृता | | |
| १ प्रस्ता. | ३ निजनामांकिता | इति नास्ति । | | |
| १ अव. | १ | 'श्रुत' इत्यधिकम् । | | |
| १ अव. | २ | 'इति सूत्रेण सम्प्रदान चतुर्थी' इत्यधिकम् । | | |
| १ अव. | ३ प्रसरणानि | प्रसारणानि | | |
| १ अव. | ४ | | तनोमि इत्यधिकम् । | |
| २ अव. | १ सामायिकादिकानि | सामायिकादिकानि | | |
| २ अव. | २ यानि षडध्ययनानि | इति नास्ति । तत्स्वरूपं शिवरमाया | | |
| २ अव. | ३ प्रपञ्चनं वरा चूर्णिः | प्रपञ्चतपरावचूर्णिः | | |
| २ अव. | ४ वृत्तिः | इति नास्ति । | | |
| २ अव. | ५ अर्थनिवहा | अर्थकथनंवहा | | |
| ३ अव. | १ निष्पादकत्वात् | निष्पादितत्वात् | | |
| ३ अव. | २ एवोर्मयः | एवकर्मयः | | |
| ४ अव. | १ | 'देवानां' इत्यधिकम् । | | |
| ५ मू. | १ स्तौम्योघनिर्युक्ति | नौम्योघनिर्युक्ति | नौम्योघनिर्युक्ति | |
| ५ अव. | १ ओघनिर्युक्तिं स्तौमि | इति नास्ति । | | |
| ५ अव. | २ खित्तकाल | इति नास्ति । | | |
| ५ अव. | ३ षष्टस्य | षष्टा | | |
| ५ अव. | ४ कालश्च | कालस्यश्च | | |
| ५ अव. | ५ रूपा ओघसामाचारी | इति नास्ति । | | |
| ५ अव. | ६ आचाराभिधवस्तुनो | आचाराधिभवस्तुनो | आचाराभि-धानवस्तुनो | |
| ५ अव. | ७ प्राभृतान्निर्युढा | प्राभृतकान्निर्युढा | | |
| ६ मू. | १ मृष्टा | मिष्टा | मिष्टा | |
| ६. अव. | १ विशुद्धि | | विशुद्धा | |
| ६. अव. | २ मृष्टाः | | मिष्टाः | |
| ७ मू. | १ कन्दलयतु | कन्दलयितु | | |
| ९ अव. | १ शान्ताख्यः | इति नास्ति । | | |
| ९ अव. | २ पूजयामि | इति नास्ति । | | |

| का.स्थ. | टि. A प्रत | B प्रत | C प्रत | D प्रत |
|---|---|---|---|---|
| ९ अव. | ३ नारदादिभिः | | नारदाभिः | |
| १० अव. | १ प्रपद्ये | | प्रतिपद्ये | |
| ११ अव. | १ श्रुतस्कन्धमयं | इति नास्ति । | | |
| ११ अव. | २ | | यदुक्तं असीससयं इत्यादि नास्ति । | |
| १२ मू. | १ नमामि | ममापि | | |
| १२ अव. | १ जुद्धसुरे | युद्धसुरे | | |
| १२ अव. | २ सरिराणुमए | सरिराणु | | |
| १२ अव. | ३ संघस्स | इति नास्ति । | | |
| १२ अव. | ४ | | देवाणं इत्यधिकम् । | |
| १२ अव. | ५ पडिकुलणयाए | | पडिकुलणाए | |
| १२ अव. | ६ साहू | इति नास्ति । | | |
| १२ अव. | ७ इच्चेइहिं | | इच्चेइ एहिं | |
| १२ अव. | ५ स्थानाङ्गाय अहं नमामि । विवक्षातः | इति नास्ति । इति न्यायात् | | |
| १३ अव. | १ समवायाङ्गं | समवायं | | |
| १४ अव. | १ | 'रङ्गन्तो ये तरङ्गाः रचनाविशेषाः ते रङ्गतरङ्गा उ कल्लोला इत्यधिकम् । | | |
| १४ अव. | २ | 'इति' इत्यधिकम् । | इति इत्यधिकम् | |
| १४ अव. | ३ पूजाभिधानम् | पूज्याभिधानम् | | |
| १६ मू. | १ सुभगार्थाः | सुभगार्थो | | |
| १७ मू. | १ गौतमपद्मावती | गोतपद्मावती | | |
| १७ अव. | १ कृतिन | सुकृतिन | | |
| १८ अव. | १ जालिमुख्याः । जालिमुख्या | | इति नास्ति । | |
| १८ अव. | २ अनुत्तराणि | अनुत्तरादिभि | | |
| १९ मू. | १ अवतरदिष्ट | | अवरतदिष्ट | |
| १९ अव. | १ अवतरो | अवतारो | | |
| २० मू. | १ ज्ञातैर्मृगा | ज्ञातैमृगा | | |
| २० अव. | १ केषां | | तेषां | |

| का.स्थ. | टि. A प्रत | B प्रत | C प्रत | D प्रत |
|---|---|---|---|---|
| २० अव. | २ इत्यत्र | इत्यर्थत्र | | |
| २० अव. | ३ | | परमते इत्यधिकम् । | |
| २० अव. | ४ सर्वगणधर | | पूर्वगणधर | |
| २० अव. | ५ एतद्वाचनाग्रहणात् | एतद्वाग्रहणात् | | |
| २१ मू. | १ प्रणिधाय यत्प्रवृत्ता | प्रणिधायवत् प्रवृत्ता | | |
| २१ अव. | १ ततिः | ततः | | |
| २१ अव. | २ अतिदेशो अन्यत्र | अतिदेशान्य अन्यत्र | | |
| २१ अव. | ३ देवनरनारकाणाम् | | देवनरकाणाम् | |
| २१ अव. | ४ शस्त्रपरिज्ञाध्ययन | शस्त्रपरिज्ञाताध्ययन | | |
| २१ अव. | ५ भवइ | हवइ | | |
| २१ अव. | ६ तत्र | तदत्र | तदत्र | |
| २२ अव. | १ दृष्टं | इति नास्ति । | | |
| २२ अव. | २ सङ्घो | सङ्घ | | |
| २२ अव. | ३ देवस्य | | देवेभ्यः | |
| २२ अव. | ४ किमित्ययमुत्कृष्ट | किमित्युत्कृष्ट | | |
| २३ मू. | १ नवक | | | कान्ति |
| २३ मू. | २ सुगमगमगहनं | | | सुगमगहनं |
| २३ अव. | १ युक्तयस्तासां | अधिकारास्तासां | अधिकारास्तासां | |
| २३ अव. | २ नवकं तेन | नवकेन | नवकेन | नवकेन |
| २३ अव. | ३ अभिगमो | अभिमो | | |
| २४ मू. | १ भव | | भाव | भाव |
| २४ अव. | १ पनायामि | यामि | | |
| २५ मू. | १ तुभ्यमस्तु नमः | तुभ्यमस्तुमः | | |
| २५ अव. | १ पञ्चमोपाङ्गं | पञ्चमाङ्गोपाङ्गं | | |
| २५ अव. | २ जन्ममहः | | जन्महः | |
| २६ मू. | १ यमलजाति | यमलयात | | यमलजात |
| २६ मू. | २ आत्मनापि | आत्मनोपि | | |
| २६ अव. | १ गुम्फवपुषैव | गुम्फवपुषैर्गुम्फेनैव | | |
| २७ मू. | १ विजेषीरन् | | | जेषीरन् |
| २७ अव. | १ वैरे | | | इति नास्ति । |
| २७ अव. | २ दुरितैः | इति नास्ति । | | |
| २७ अव. | ३ प्राप्तिर्याभिस्ता | | | प्राप्तिर्यकाभिस्ता |
| २८ मू. | १ पद्मादयः | | | पद्मावतं |
| २८ अव. | १ देवत्वं | इति नास्ति । | | |
| २८ अव. | २ कथिताः | | उक्ताः | उक्ताः |
| २८ अव. | ३ सोहम्मीसाणकप्प | सोहम्मीण कप्पे जाणि | | |
| २९ मू. | १ अगृणाद् गणाधिपः | अगृणाधिपः | | |

| का.स्थ. | टि. A प्रत | B प्रत | C प्रत | D प्रत |
|---|---|---|---|---|
| २९ अव. | १ बहुपुत्रिकाऽनपत्या | बहुपुत्रिकाऽपनत्या | | |
| ३० मू. | १ सूत्रितं | | कीर्तितं | |
| ३० अव. | १ मे=मम | इति नास्ति । | | |
| ३१ मू. | १ शुभाम् । | शुभम् । | | |
| ३१ अव. | १अन्धकवृष्णिगोत्रजा | अन्धकवृष्णिदशा भक्तिपरायणाना नां द्वादशानां यशःस्त्रजो यशोमाला इव | | |
| ३३ अव. | १ तन्दुलवैचारिकं | तन्दुलवैतालिकं | | |
| ३४ मू. | १ नमो नमः । | नामा नस । | | |
| ३४ अव. | १ उद्धाताऽनुद्धा-तारोपणात्मने | उद्धातात्मने | | |
| ३४ अव. | २ | 'जीवाजीवभाव प्ररूपिकं प्रज्ञापनां समवायाङ्गोपाङ्गं यामि स्तौमि शामार्यस्य कालिकाचार्यस्य अमलयशस्तत्र तदधिकारात्' इत्यधिकम् । | | |
| ३४ अव. | ३ अपवादः कारणे | अपवादेः करणे | | |
| ३४ अव. | ४ आचाराङ्गपञ्चम-चूडायै नमो नमः वीप्सायां द्वित्वम् | इति नास्ति । | | |
| ३५ अव. | १ | | ग्रन्थे इत्यधिकम् । | |
| ३५ अव. | २ सह वर्तते यः स | | इति नास्ति । | |
| ३६ अव. | १ फलदः | फलः | | फलप्रद |
| ३७ मू. | १ धुनान्त्येनापि | धुनान्तेनापि | | |
| ३७ मू. | २ कल्पकल्पं | | | कल्पमल्पं |
| ३७ मू. | ३ श्रये | | श्रिये | |
| ३७ अव. | १ यदाचारेण | | | जीतनाम्ना |
| ३७ अव. | २ आणा | इति नास्ति । | | |
| ३७ अव. | ३ जीतव्यवहारोऽन्त्यः | जीतव्यवहारोऽन्त्यः । | | |
| ३८ अव. | १ | | निर्युढं योगं | निर्युढं योगं |

| का.स्थ. | टि. A प्रत | B प्रत | C प्रत | D प्रत |
|---|---|---|---|---|
| | | | इत्यधिकम् । | इत्यधिकम् । |
| ३९ मू. | १ सङ्ग्रहणी | | | सङ्ग्रही |
| ३९ मू. | २ निवसन्तु | | | नवसन्तु |
| ३९ अव. | १ सूत्रोक्तार्थ | सूत्रार्थ | | |
| ३९ अव. | २ अपि | इति नास्ति । | | |
| ४० अव. | १ पूर्वाणि | पूर्वाङ्गेभ्योऽर्थतो | | |
| ४० अव. | २ ध्यायामि । | ध्यायातामि । | | |
| ४० अव. | ३ सूत्रकृताङ्गे | इति नास्ति । | | |
| ४० अव. | ४ इत्यादि अथवा गणहरकयमंगगयं | इति नास्ति । | | |
| ४० अव. | ५ जं कय | जं कथ्य | | |
| ४१ मू. | १ विधि | | | हृदि |
| ४२ अव. | १ वन्दे. विशेषणवर्ती सम्मति नयचक्रवाल तत्त्वार्थान् । ज्योतिष्करण्डसिद्ध-प्राभृत वसुदेवहिण्डीश्च | इति नास्ति । | | |
| ४४ अव. | १ कृतमपि | कृतमभिपि | | |
| ४४ अव. | २ सम्यगष्टयो | सम्यग् दैवौ दृष्टयो देवाः तत् | | |
| ४४ अव. | ३ श्रुतज्ञानं | ज्ञातं | | |
| ४५ अव. | १ मध्यगां | मध्यमगां | | |
| ४५ अव. | २ आचार्यमन्त्रं च नमस्करोमि | आचार्य नमस्करोति | | |
| ४६ मू. | १ तोषाद्वरं | तोषाद्वारं | | |
| ४६ अव. | १ श्रुतेन सङ्घादिकार्ये ग्राम उद्वास्यते समुत्थानश्रुतेन | इति नास्ति । | | |
| ४६ अव. | २ उप्पाहि | उप्पाइ | | |
| ४६ अव. | ३ पुण्डरीकमुत्प्लुत्य | पुण्डरीकतुल्लत्य | | |

• • •

परिशिष्ट–५

# व्याख्याकोशः

| शब्दः | व्याख्या | श्लोकः |
|---|---|---|
| अञ्चामि= | पूजयामि | ९, ३८ |
| अतिदेश= | अन्यत्र विस्तरेण प्ररूपितस्य वस्तुनः सङ्क्षेपेण कथनम् | २१ |
| अधिकृत= | प्रकटित | १७ |
| अनवरम= | रम्य | ९ |
| अनुत्तर= | प्रधान | १८ |
| अपवाद= | कारणे प्रतिषिद्धसेवा | ३४ |
| अपुनर्भवपुर= | मोक्षनगर | ८ |
| आरोपण= | उचितस्थाने प्रयोजनम् | ३४ |
| आश्रवविधि= | कर्मपुद्‍गलादान | १९ |
| इन= | श्रीवीर | २२ |
| उत्सर्ग= | मुख्यमार्ग | ३४ |
| उदञ्चित= | प्रकटीकृत | १० |
| उद्घात= | गुरूप्रायश्चित्तविशेष | ३४ |
| उपपद= | पूर्वपद | १८ |
| उपपात= | उत्पाद | २१ |
| उपाङ्ग= | अङ्गस्योप=समीपे | २१ |
| उपोद्घात= | शास्त्रस्यादि | ५ |
| ओघ= | सामान्य | ५ |
| कल्प= | साध्वाचार | ३५ |
| कल्पवतंस= | देवत्व | २८ |
| चूर्णि= | अवचूर्णि | ३९ |
| जालि= | नमिऋषि | १८ |
| जिनागम= | श्रीवीरसिद्धान्त | १ |
| ज्ञात= | दृष्टान्त | १५ |
| टिप्पनक= | विषमपदव्याख्या | ३९ |
| टीका= | निरन्तरव्याख्या | ३९ |
| तति= | श्रेणि | २१ |

| | | |
|---|---|---|
| नवमरस= | शान्तरस | ९ |
| नव्य= | भिन्न | २६ |
| निशीथ= | मध्यरात्र | ३४ |
| पनायामि= | स्तौमि | २४ |
| परिग्रह= | स्वीकृति | ४४ |
| पिण्ड= | आहार | ६ |
| प्रतिपत्ति= | युक्ति | २३ |
| प्रतिविधि= | उत्तर | १४ |
| प्रमेय= | पदार्थ | ३ |
| प्ररूपण= | कथन | १३ |
| प्रवचन= | जिनमत | ७ |
| प्रशमि= | ऋषि | १८ |
| भावदृक्= | ज्ञान | १६ |
| भाष्य= | सूत्रार्थप्रपञ्चन | २ |
| भाष्य= | सूत्रोक्तार्थप्रपञ्चक | ३९ |
| महाहवा= | महायुद्ध | २७ |
| वार्तिक= | उक्तानुक्तदुरूक्तार्थानां चिन्ताकारि | ३९ |
| विधि= | दोषरहित्वेन विशुद्धि | ६ |
| विपाक= | परिणाम | २० |
| वृजिन= | पाप | १ |
| वृत्ति= | अनुगतार्थकथन | २ |
| वृष्णि= | अन्धकवृष्णिगोत्रज | ३१ |
| व्यवहार= | आचार | ३७ |
| श= | सुख | १९, २९ |
| शमीश= | ऋषी | २८ |
| श्यामार्य= | कालिकाचार्य | २४ |
| श्रुतदेवता= | सरस्वती | १ |
| श्रुति= | श्रवण | ६ |
| संवर= | आश्रवनिरोध | १९ |
| सङ्ग्रहणी= | सूत्रोक्तार्थसङ्ग्राहिका | ३९ |
| सम्यग्दृष्टि= | जैन | ४४ |
| हादिनी= | वज्र | ११ |

## परिशिष्ट–६

# सम्पादनोपयुक्तग्रन्थसूची

| ग्रन्थ का नाम | सम्पादक | प्रकाशक |
|---|---|---|
| काव्यमाला भा–७ | | निर्णयसागर |
| जैन साहित्यनो संक्षिप्त इतिहास ( जै.सा.सं.इ ) | मोहनलाल दलीचंद देसाई | मो द. देसाई |
| जैनस्तोत्रसन्दोह | | |
| ठाणांग समवायांग | मुनिश्री जम्बूविजयजी | महावीर जैन विद्यालय, मुंबई |
| नन्दीसूत्रम् | मुनिश्री पुण्यविजयजी | प्राकृत ग्रंथ परिषद्, अहमदाबाद |
| निर्युक्ति सङ्ग्रह | आ. श्री विजय–जिनेन्द्रसूरिजी | हर्षपुष्पामृत–ग्रन्थमाला, जामनगर |
| न्यायसङ्ग्रहः | | हर्षचन्द्र भुराभाई |
| प्राकृतपद्यानामकारादि क्रमेण अनुक्रमणिका १–२ | मुनिश्री विनयरक्षित वि. | शास्त्रसंदेशमाला, सुरत |
| संस्कृत पद्यानामकारादि क्रमेण अनुक्रमणिका १ | मुनिश्री विनयरक्षित वि. | शास्त्रसंदेशमाला, सुरत |
| सिद्धहेमशब्दानुशासन | पं. बेचरदास दोशी | युनि. ग्रन्थ निर्माण बोर्ड, अहमदाबाद. |

• • •

## मुखपृष्ठ परिचय

प्रकृति के प्रसिद्ध पांच मूल तत्त्व है। पृथ्वी, जल, अग्नि, वायु, आकाश। भारत का प्रत्येक दर्शन या धर्म इन पांच में से किसी एक तत्त्व को केंद्र में रखकर विकसित हुआ है। जैन धर्म का केंद्रवर्ती तत्त्व अग्नि है। अग्नि तत्त्व ऊर्ध्वगामी, विशोधक, लघु और प्रकाशक है।

श्रुतज्ञान अग्नि की तरह अज्ञान का विशोधक है और प्रकाशक है। अग्नि के इन दो गुणधर्मों को केंद्र में रखकर मुखपृष्ठ का पृष्ठभूमि (Theme) तैयार किया गया है।

कृष्ण वर्ण अज्ञान और अशुद्धिका प्रतीक है। अग्नि का तेज अशुद्धियों को भस्म करते हुए शुद्ध ज्ञान की और अग्रसर करता है। विशुद्धि की यह प्रक्रिया श्रुतभवन की केंद्रवर्ती संकल्पना (Core Value) है।

अग्नि प्राण है। अग्नि जीवन का प्रतीक है। जीवन की उत्पत्ति और निर्वाह अग्नि के कारण होता है। श्रुत के तेज से ही ज्ञानरूप कमल सदा विकसित रहता है और विश्व को सौंदर्य, शांति एवं सुगंध देता है। चित्र में सफेद वर्ण का कमल इसका प्रतीक है।

श्रुतभवन में अप्रगट, अशुद्ध और अस्पष्ट शास्त्रों का शुद्धिकरण होता है। शुद्धिकरण के फलस्वरूप श्रुत तेज के आलोक में ज्ञानरूपी कमल का उदय होता है।